# कृषिकाः कर्मवीराः

## Question 1:

उच्चारणं कुरुत-

| | | |
|---|---|---|
| सूर्यस्तपतु | जीर्णम् | शीतकालेऽपि |
| वारयितुम् | ग्रीष्मे | सस्यपूर्णानि |
| पदत्राणे | कण्टकावृता | क्षुधा-तृषाकुलौ |

## Answer 1:

विद्यार्थी इसे स्वयं पढ़ें।

## Question 2:

श्लोकांशान् योजयत-

| क | ख |
|---|---|
| गृहं जीर्णं न वर्षासु | तौ तु क्षेत्राणि कर्षतः। |
| हलेन च कुदालेन | या शुष्का कण्टकावृता। |
| पादयोर्न पदत्राणे | सस्यपूर्णानि सर्वदा। |
| तयोः श्रमेण क्षेत्राणि | शरीरे वसनानि नो। |
| धरित्री सरसा जाता | वृष्टिं वारयितुं क्षमम्। |

## Answer 2:

| क | ख |
|---|---|
| गृहं जीर्णं न वर्षासु | वृष्टिं वारयितुं क्षमम्। |
| हलेन च कुदालेन | तौ तु क्षेत्राणि कर्षतः। |
| पादयोर्न पदत्राणे | शरीरे वसनानि नो। |
| तयोः श्रमेण क्षेत्राणि | सस्यपूर्णानि सर्वदा। |
| धरित्री सरसा जाता | या शुष्का कण्टकावृता। |

## Question 3:

उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत-

| | |
|---|---|
| यथा- कृषकाः शीतकालेऽपि कर्मठाः भवन्ति। | आम् |

| | |
|---|---|
| कृषकाः हलेन क्षेत्राणि न कर्षन्ति। | न |
| (क) कृषकाः सर्वेभ्यः अन्नं यच्छन्ति। | |
| (ख) कृषकाणां जीवनं कष्टप्रदं न भवति। | |
| (ग) कृषकः क्षेत्राणि सस्यपूर्णानि करोति। | |
| (घ) शीते शरीरे कम्पनं न भवति। | |
| (ङ) श्रमेण धरित्री सरसा भवति। | |

## Answer 3:

| | |
|---|---|
| यथा- कृषकाः शीतकालेऽपि कर्मठाः भवन्ति। | आम् |
| कृषकाः हलेन क्षेत्राणि न कर्षन्ति। | न |
| (क) कृषकाः सर्वेभ्यः अन्नं यच्छन्ति। | आम् |
| (ख) कृषकाणां जीवनं कष्टप्रदं न भवति। | न |
| (ग) कृषकः क्षेत्राणि सस्यपूर्णानि करोति। | आम् |

| | |
|---|---|
| (घ) शीते शरीरे कम्पनं न भवति। | न |
| (ङ) श्रमेण धरित्री सरसा भवति। | आम् |

## Question 4:

मञ्जूषातः पर्यायवाचिपदानि चित्वा लिखत-

| | | | | | |
|---|---|---|---|---|---|
| रविः | वस्त्राणि | जर्जरम् | अधिकम् | पृथ्वी | पिपासा |

वसनानि ...........................

सूर्य ...........................

तृषा ...........................

विपुलम् ...........................

जीर्णम् ...........................

धरित्री ...........................

## Answer 4:

वसनानि वस्त्राणि

सूर्य रविः

| | |
|---|---|
| तृषा | <u>पिपासा</u> |
| विपुलम् | <u>अधिकम्</u> |
| जीर्णम् | <u>जर्जरम्</u> |
| धरित्री | <u>पृथ्वी</u> |

## Question 5:

मञ्जूषातः विलोमपदानि चित्वा लिखत-

| | | | | | |
|---|---|---|---|---|---|
| धनिकम् | नीरसा | अक्षमम् | दुःखम् | शीते | पार्श्वे |

| | |
|---|---|
| सुखम् | ........................... |
| दूरे | ........................... |
| निर्धनम् | ........................... |
| क्षमम् | ........................... |
| ग्रीष्मे | ........................... |
| सरसा | ........................... |

## Answer 5:

| | |
|---|---|
| सुखम् | <u>दुःखम्</u> |
| दूरे | <u>पार्श्वे</u> |
| निर्धनम् | <u>धनिकम्</u> |
| क्षमम् | <u>अक्षमम्</u> |

| | |
|---|---|
| ग्रीष्मे | <u>शीते</u> |
| सरसा | <u>नीरसा</u> |

## Question 6:

प्रश्नानाम् उत्तराणि लिखत-

(क) कृषकाः केन क्षेत्राणि कर्षन्ति?

(ख) केषां कर्मवीरत्वं न नश्यति?

(ग) श्रमेण का सरसा भवति?

(घ) कृषकाः सर्वेभ्यः किं किं यच्छन्ति?

(ङ) कृषकात् दूरे किं तिष्ठति?

## Answer 6:

(क) कृषकाः हलेन कुदालेन च क्षेत्राणि कर्षन्ति।

(ख) कृषिकाणां कर्मवीरत्वं न नश्यति।

(ग) श्रमेण धारित्री सरसा भवति।

(घ) कृषकाः सर्वेभ्यः शाकम्, अन्नम्, दुग्धम् च यच्छन्ति।

(ङ) कृषकात् दूरे सुखम् तिष्ठति।